**संस्कृत वार्ता:**

**दिनाङ्क : 25/04/2026** **सायम् - 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

· पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय प्रचारः तीव्रः अभवत्, यत्र विभिन्नां राजनैतिकदलानां वरिष्ठाः नेतारः सम्पूर्णे राज्ये सभाः कुर्वन्ति।

· प्रशासनेन उक्तं यत् देशे उर्वरकोपलब्धता दृढतया स्थिरा अस्ति।

· अमेरिकादेशस्य विशेषदूतः स्टीव् विट्कॉफः, वरिष्ठोपदेशकः जेरेड कुशनरः च ईरान-देशेन सह शान्तिसम्वादार्थं पाकिस्तानं गमिष्यन्ति इति अमेरिकादेशेन दृढीकृतम्। तेहरानेन उक्तं यत् इस्लामाबादे अमेरिकादेशेन सह प्रत्यक्ष-वार्तालापस्य कापि योजना नास्ति।

· संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां चेरनोबिल-परमाणु-दुर्घटनायाः चत्वारिंशत्तमं वर्षं विश्वं आचरति, परमाणु-ऊर्जायाः शान्तियुत-उपयोगाय आह्वानम् अभवत्।

· ऋतुविभागेन अद्य उत्तरभारतस्य अनेकेषु भागेषु उष्णतरङ्गस्य, पूर्वोत्तरराज्येषु प्रचण्डवृष्टेः च सूचना प्रसारिता।

· **अपि च**

· आई. पी. एल. क्रिकेट-क्रीडायां, दिल्ली-कैपिटल्स-पञ्जाब-किङ्ग्स- दलयोः मध्ये स्पर्धा प्रचलति। सायङ्काले राजस्थान-रायल्स- दलं, सनराइजर्स-हैदराबाद दलं सम्मुखी करिष्यति।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>पश्चिमबङ्गाल द्वितीयान्तिमचरण</u>**

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय च प्रचारः तीव्रः अभवत्, यत्र विभिन्नानां राजनैतिकदलानां वरिष्ठनेतारः राज्ये अनेकाः सभाः, पथ प्रदर्शनानि च कुर्वन्ति। भाजपेति दलस्य वरिष्ठाः नेतारः अद्य राज्ये प्रचाराभियाने सन्लग्ना: सन्ति। केन्द्रीय-गृह-मन्त्री अमितशाहः पूर्वी-बर्दवान-हावडा-नगरयोः जनसभां सम्बोधयति, तदनन्तरं हावडा-दक्षिण-कोलकाता-नगरयोः पथ प्रदर्शनम् अपि करिष्यति। केन्द्रीय-स्वास्थ्य-मन्त्री जे. पी. नड्डा पूर्वी-बर्दवान-नदिया-क्षेत्रयोः पथ-प्रदर्शनं कुर्वन् अस्ति, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः नवद्वीपं प्राप्तवान् अस्ति। तृणमूल-काङ्ग्रेस-दलस्य प्रमुखा ममता-बनर्जी हुगली, दम-दम, भवानीपुर, बेहाला इत्येतेषु क्षेत्रेषु प्रचाररताऽस्ति। दलस्य सामान्यसचिवः अभिषेक बनर्जी दक्षिण-24 परगनायां, हावडायां, मानिकतलायां च सभाः करोति। काङ्ग्रेस-दलस्य नेता राहुलगान्धी अपि अद्य श्रीरामपुरे, कोलकातानगरस्य शहीद-मिनारे, मेटियाब्रूजे च तिस्रः जनसभाः सम्बोधयति। वाममोर्चा अपि प्रचाराभियाने सक्रियः अस्ति, यत्र सी. पी.आई. एम. इत्यस्य दलस्य राज्यसचिवः मोहम्मद सलीमः, वयोवृद्धः नेता असिम दासगुप्तः च हावडायां, पानीहाट्यां, खरदाहे च पथ प्रदर्शनस्य , सभायाः च नेतृत्वं कुर्वन्तौ स्तः।

**<u>सर्वकारेण- उर्वरक-भण्डारः</u>**

सर्वकारेण पुनः दृढीकृतं यत् देशे उर्वरक-भण्डारः सुदृढ:, स्थिर:, सुव्यवस्थित: च अस्ति, सर्वेषां प्रमुखाणां उर्वरकाणाम् उपलब्धता आवश्यकतापेक्षया अधिकमेव अस्ति। रसायन-उर्वरक-मन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् सद्यः एव प्रसारिताभियोगाः तथ्यैः समर्थिताः न सन्ति। तेन सूचितं यत् सद्यैव समाप्तस्य अस्य रबी- सत्रस्य वर्तमानस्य च दत्तांशः राष्ट्रव्यापीरूपेण सुखप्रदं सुसम्बद्धं च आपूर्ति-स्थितिं सूचयति।

**<u>पश्चिम-एशियादेशे</u>**

इस्राएल्-हिज़्बुल्ला-इत्येतयोः मध्ये निरन्तरम् उद्विग्नतायाः मध्ये सम्पूर्णे पश्चिम-एशियादेशे कूटनीतिः तीव्रतरः भवति, यद्यपि दुर्बलः युद्धविरामोपि संकटे एवास्ति। इरान्-देशस्य विदेश-मन्त्री अब्बास अराघची महत्त्वपूर्ण-चर्चायै इस्लामाबादे सम्प्राप्तवान् अस्ति, यत्र तेहरान्-देशेन उक्तं यत् द्वन्द्वस्य समाप्तेः विषये तस्य स्थितिः प्रत्यक्षतया अमेरिका देशं प्रति नोक्त्वा पाकिस्तानं प्रति प्रेषयिष्यति। इरान्-देशस्य विदेश-मन्त्रालयेन स्पष्टं कृतं यत् वाशिङ्गटन्-इत्यनेन सह प्रत्यक्ष-उपवेशनस्य योजना नास्ति। परञ्च अमेरिका-देशेन दृढीकृतम् यत् तस्य विशेषदूतः स्टीव् विट्कॉफ, वरिष्ठोपदेशकः जेरेड कुशनर: च इरानस्य समकक्षैः सह वार्तालापार्थं पाकिस्तानं गच्छत:।

**<u>विश्वं चेर्नोबिल</u>**

विश्वं चेर्नोबिल्-विनाशस्य चत्वारिंशत्तमं वर्षम् आचरति अतः संयुक्तराष्ट्रसङ्घस्य सामान्यसभायां परमाणुशस्त्राणां शान्तियुतप्रयोगस्य आह्वानम् अभवत्। ह्यः विशेष-स्मरणीय-सभायां संयुक्तराष्ट्रसङ्घस्य सामान्यसभायाः अध्यक्षा एनालेना बेयरबाक् इत्येषा उक्तवती यत् चेर्नोबिल् इत्यस्य परिमापः स्पष्टः एव अस्ति यत् परमाणु-तन्त्रज्ञानस्य, शान्तिरूपेण उपयोगेनापि, अन्यैः तन्त्रज्ञानैः मूलभूतरूपेण भिन्नः एव अस्ति।षडशीत्यधिक ऊनविंशतिशततमे वर्षे अप्रैल-मासस्य षड्विंशति दिनांके चेर्नोबिल-परमाणु-ऊर्जाकेन्द्रस्य इतिहासस्य निकृष्टतमासु परमाणु-दुर्घटनासु अन्यतमा अभवत्, येन सम्पूर्णे यूक्रेन-देशे, बेलारूस्-देशे, यूरोप-देशस्य च अन्येषु भागेषु च रेडियो-एक्टिव्-दूषणस्य प्रसारः अभवत्। बेयरबाकः अवदत् यत् अशीति-लक्षतोप्यधिकाः जनाः विकिरणस्य संस्पर्शे आगताः, सहस्रशः जनाः मृताः, बालकाः ल्युकेमिया इत्यादिभिः रोगैः च पीडिताः अभवन्।

**<u>अश्विनी वैष्णवः- बुलेट-रेल</u>**

केन्द्रीयरेलमन्त्री अश्विनी वैष्णवः अद्य बेङ्गलूरुनगरे (बी. ई. एम. एल.) इति आत्मानिर्भर उच्चगति-बुलेट-रेल-निर्माणकेन्द्रस्य आदित्येत्यस्य उद्घाटनम् अकरोत्। आकावाण्या दूरदर्शनेन च सह वार्तालापं कुर्वन् सः सूचितवान् यत्

प्रथमं प्रोटोटाईप अग्रिमे वर्षे प्रकाशयिष्यते तथा च सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य उत्तरभागे निर्माणम् भविष्यति।

मन्त्रिणा घोषितं यत् अग्रिमेषु कतिपयेषु मासेषु बेङ्गलूरु-मुम्बई-मडगांव-वंदेभारतेत्यस्य सेवा आरभ्यते। बेङ्गलूरु-मुम्बई-नगरयोः मध्ये सूपरफास्ट तथा वंदेभारत-शयन-रेल-यानम अपि शीघ्रमेव प्रचलिष्यति।

**<u>ऋतु-विभाग</u>**

भारत-ऋतु-विभागेन अद्य दिल्ली, हरियाणा, पञ्जाब, चण्डीगढ इत्यादिषु केषुचित् भागेषु उष्णतरङ्गस्य स्थितेः पीत-वर्णीया सञ्चेतना प्रसारिता अस्ति। राजस्थान-उत्तरप्रदेशयोः अपि श्वः यावत् एतादृशि एव स्थितिः भविष्यति। अद्य बिहार, आन्ध्रप्रदेशस्य तटीयप्रदेश, कर्णाटक, गुजरात, पश्चिमबङ्गालस्य गाङ्गेय-प्रदेश, केरलम्, माहे-प्रदेश, कोङ्कण, गोवा, मणिपुर राज्यानां च केषुचित् भागेषु च उष्ण-आर्द्र-ऋतुः भविष्यति। अत्रान्तरे, अद्य अरुणाचलप्रदेशे, असम-राज्ये, मेघालये, उपहिमालयीये पश्चिमबङ्गे, सिक्किमे च प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमितम्।

**<u>आईपीएल</u>**

आईपीएल क्रिकेट क्रीडायां दिल्ली-कैपिटल्स पंजाब-किंग्स इत्येतयोः दलयोः मध्ये क्रीडा सम्प्रति प्रचलति। दिल्ली-कैपिटल्स-दलेन पंजाब-किंग्स-दलस्य सम्मुखे पञ्चषष्ठ्यधिक द्विशत धावनांकानां लक्ष्यं स्थापितम्। तत्रैव सायं सार्द्धसप्तवादने अन्यस्यां स्पर्धायां राजस्थान-रॉयल्स-दलं सनराइजर्स-हैदराबाद-दलं सम्मुखी करिष्यति।

**।। इति वार्ताः ।।**